योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०८०

अशीतितमः सर्गः ८०

श्रीवसिष्ठ उवाच ।

इति ते सर्वं आयाता ब्रह्मलोकनिवासिनः ।

अदृश्यतामेव गता दीपाः क्षीणदशा इव ।। १

अथ ते द्वादशादित्या ब्रह्मणि ब्रह्मतां गते ।

जगद्वद्ब्रह्मलोकं तमदहन्भास्वरार्चिषः ।। २

वैरिञ्चनगरं दग्ध्वा ध्यानं कृत्वा विरञ्चिवत् ।

तेऽपि निर्वाणमाजग्मुर्निःस्नेहदशदीपवत् ।। ३

तत एकार्णवापूरो विरिञ्चनगरान्तरम् ।

रात्रौ भुवमिव ध्वान्तं पूरयामास सूर्मिमान् ।। ४

आब्रह्मलोकमभवज्जगदापूर्णमर्णसा ।

तुल्यं रसैकपूर्णेन पक्वद्राक्षाफलेन तत् ।। ५

तत्तदूर्मिगिरिव्रातखगैरावलिताः खिलाः ।

विच्छिन्नाः कल्पजलदा जल एव निलिल्यिरे ।। ६

एतस्मिन्नन्तरे तत्र दृष्टवानहमम्बरात् ।

यावदभ्युदितं भीमं भीतः किंचिन्नभोन्तरात् ।। ७

कल्पान्तजगदाकारं कृष्णमापूरिताम्बरम् ।

आकल्पं संभृतं नैशं देहेनेवोत्थितं तमः ।। ८

तरुणादित्यलक्षाणां तेज आभास्वरं दधत् ।

आदित्यत्रयसंकाशैः स्थिरविद्युच्चयोल्वणैः ।। ९

नेत्रैराभास्वरमुखं ज्वालापुञ्जसमुद्गिरम् ।

पञ्चाननं दशभुजं त्रिनेत्रं शूलपाणिकम् ।। १०

आयान्तमन्तमुक्तेऽपि व्योम्नीव वितताकृतिम् ।
खमिवासि घनश्यामं देहमासाद्य संस्थितम् ।। ११
स्थितमेकार्णवापूर्णाद्ब्रह्माण्डाद्बहिरम्बरे ।
व्योमेव हस्तपादादिसंनिवेशेन लक्षितम् ।। १२
घोणानिलपरावृत्तिविधूतैकमहार्णवम् ।
गोविन्दमिव दोर्दण्डक्षोभितक्षीरसागरम् ।। १३
कल्पार्णवजलापूरं पुंस्त्वेनेव समुत्थितम् ।
मूर्तियुक्तमहंकारमस्तकारणमागतम् ।। १४
कुलाचलबृहद्वृन्दमिवोड्डयनडम्बरैः ।
पक्षौघैरुत्थितं व्योम समस्तमभिपूरयत् ।। १५
ततस्त्रिशूलनयनैर्मया रुद्रोऽयमित्यसौ ।
दूरादेव परिज्ञाय परमेशो नमस्कृतः ।। १६
श्रीराम उवाच ।
किं स तादृग्विधो रुद्रः किं कृष्णः किं महाकृतिः ।
किं पञ्चवदनः कस्माद्दशबाहुः स तिष्ठति ।। १७
किं त्रिनेत्रः किमुग्रात्मा किमेकः किंप्रयोजनः ।
केनेरितः किमकरोच्छायासीद्वद का मुने ।। १८
श्रीवसिष्ठ उवाच ।
काकुत्स्थ रुद्रनामासावहंकारतयोत्थितः ।
विषमैकाभिमानात्मा मूर्तिरस्यामलं नभः ।। १९
व्योमाकृतिः स भगवाम्व्योमवर्णो महाद्युतिः ।
चिद्व्योममात्रसारत्वादाकाशात्मा स उच्यते ।। २०
सर्वभूतात्मभूतत्वात्सर्वगत्वान्महाकृतिः ।
यानि तस्यानुषक्तानि पञ्च खानीन्द्रियाण्यलम् ।। २१
तानि तस्य मुखान्याहुस्तपद्रूपाणि सर्वतः ।
कर्मेन्द्रियाणि विषयास्ते हि तस्य भुजा दश ।। २२

सर्वभूतनरैः सार्धं ब्रह्मणा परमेयुषा ।
यदासौ संपरित्यक्तस्तदा स्वां मूर्तिमागतः ।। २३
स चैकांशैकरूपात्मा नास्ति तस्य हि साकृतिः ।
तथा दृश्यत एवासौ भ्रान्तिमात्रेण मूर्तिमान् ।। २४
चिदाकाशगते स्फारे भूताकाशे स तिष्ठति ।
देहे च सर्वभूतानां नित्यं वायुरिवेश्वरः ।। २५

सर्वभूतपरित्यक्तस्तस्मिन्काले खमूर्तिमान् ।
क्षोभयन्स क्षणं क्षीणः परमां शान्तिमेष्यति ।। २६
ये गुणाकृतयः कालाश्चित्ताहंकारबुद्धयः ।
प्रणवस्य च ये वर्णा ये च वेदास्तथा त्रयः ।। २७
रुद्रस्य तस्य ते नेत्रसंनिवेशेन संस्थिताः ।
त्रिशूलं तेन त्रैलोक्यं गृहीतं करकोटरे ।। २८
यस्मात्तद्व्यतिरेकेण सर्वभूतगणेष्वपि ।
अन्यन्न विद्यते किंचिद्देहात्मैव ततः स्थितः ।। २९
सर्वसत्त्वोपलम्भात्मा स्वभावोऽस्य प्रयोजनम् ।
ईरितः शिवरूपेण चिन्मात्राकाशरूपिणा ।। ३०
तेनैव च निगीर्णः सन्परमां शान्तिमेत्यसौ ।
निर्मलाकाशरूपाप्मा कृष्ण इत्येष ईश्वरः ।। ३१
कृत्वा कल्पं जगत्सर्वं तत्पीत्वैकार्णवं तदा ।
स प्रयाति परां शान्तिमभूयःसंनिवृत्तये ।। ३२
अनन्तरं मया दृष्टस्तत्रासौ यावदुद्यमात् ।
प्रवृत्तः प्राणवेगेन तमाक्रष्टुं महार्णवम् ।। ३३
अथ तस्य मुखं स्फारं ज्वालामालाकुलान्तरम् ।
प्राणाकृष्टो महाम्भोधिर्वाडवाग्निमिवाविशत् ।। ३४
स एव वाडवो भूत्वा वह्निराकल्पमर्णवे ।

अहंकारः पिबत्यम्बु रुद्रः सर्वं तु तत्तदा ।। ३५

पातालमिव पानीयं सर्पो बिलमिव क्षणात् ।

पञ्चवायुरिवाकाशमविशत्तन्मुखं जवात् ।। ३६

समुपेत्यापिबद्रुद्रः स मुहूर्तेन तत्पयः ।

कृष्णाङ्गोऽर्क इव ध्वान्तं सत्संपर्क इवागुणम् ।। ३७

आब्रह्मलोकपातालं शान्तं शून्यमथाभवत् ।

रजोधूमानिलाम्भोधिभूतमुक्तं समं नभः ।। ३८

केवलं तत्र दृश्यन्ते चत्वारो व्योमनिर्मलाः ।

इमे पदार्था निस्पन्दाः श्रृणु तान्रघुनन्दन ।। ३९

एकस्तावदसौ मध्ये रुद्रः कृष्णाम्बराकृतिः ।

निराधारः स्थितो व्योम्नि निस्पन्दामोदबिम्बवत्।।४०

द्वितीयोऽवस्थितो दूरे पृथ्व्याकाशतलोपमः ।

भागो ब्रह्माण्डसदनस्याधः पातालसप्तकात् ।। ४१

पातालभूतलदिवां सशैलेन्द्रदिवौकसाम् ।

व्याप्तः पार्थिवभागेन पङ्कमात्रात्मनात्मभाक् ।। ४२

तृतीयोऽत्र पदार्थोऽभूदूर्ध्वं ब्रह्माण्डभागभूः ।

दृष्टिक्षयात्सुदूरत्वाद्दुर्लक्ष्यगगनासितः ।। ४३

दूरविश्लिष्टयोर्मध्यं यत्तद्ब्रह्माण्डखण्डयोः ।

तदाकाशमनाद्यन्तं ब्रह्म निर्मलमाततम् ।। ४४

चतुर्थोऽसौ पदार्थस्तु तदा संलक्षितो मया ।

चतुष्टयादत्र नान्यदेतस्मादेव किंचन ।। ४५

श्रीराम उवाच ।

बहिः किं विद्यते ब्रह्मन्ब्रह्मसद्मकटाहतः ।

कास्तत्रावरणा ब्रूहि कियत्यः संस्थिताः कथम् ।। ४६

श्रीवसिष्ठ उवाच ।

ब्रह्माण्डखण्डयोः पारे ततो दशगुणं जलम् ।

संध्याकाशमनन्तं तद्वर्जयित्वा ततः स्थितम् ।। ४७

ततस्तथैव ज्वालात्म तेजो दशगुणं स्थितम् ।

ततस्तथैव पवनः पवनो निर्मलः स्थितः ।। ४८

ततस्तथैव विमलं नभो दशगुणं स्मृतम् ।

ततः परममत्यच्छं ब्रह्माकाशमनन्तकम् ।। ४९

अन्यत्रान्यत्र तस्याथ दृष्टयोऽन्यास्तथैव खे ।

कचन्त्यनन्ता दूरस्था मिथो दृष्टात्मसृष्टयः ।। ५०

श्रीराम उवाच ।

ऊर्ध्वे ब्रह्माण्डखण्डस्य तथाधस्तान्मुनीश्वर ।

तज्जलादिमहाकारं क्व कथं केन धार्यते ।। ५१

श्रीवसिष्ठ उवाच ।

स पार्थिवपदार्थानां स्थितः पुष्करपत्रवत् ।

भागस्तमेवाधावन्ति ते सुता मातरं यथा ।। ५२

अतो यदेव नेदीयो ब्रह्माण्डाख्यं महावपुः ।

तत्पदार्थाः प्रधावन्ति तृषिताः सलिलं यथा ।। ५३

अवलम्ब्य तदेवान्तः संस्थितास्तैजसादयः ।

न स्थितिं प्रविमुञ्चन्ति स्वां यथावयवा इव ।। ५४

श्रीराम उवाच ।

ब्रह्मन्ब्रह्माण्डखण्डे ते तिष्ठतः कथमुच्यताम् ।

किमाकृती धृते केन कथं वा परिनश्यतः ।। ५५

श्रीवसिष्ठ उवाच ।

अधृतं धृतमेवोच्चैरपतच्चैव वा पतत् ।

अनाकृत्येव साकारं जगत्स्वप्नपुरं यथा ।। ५६

किमस्य नाम पतति किंवा केनास्य धार्यते ।

यथा संवित्ति कचनं तथैतदवतिष्ठते ।। ५७

यथा केशोण्ड्रकं व्योम्नि यथा च व्योम्नि शून्यता ।

यथा वा पवने स्पन्दो जगच्चिद्गगने तथा ।। ५८

चितौ संकल्पनगरं ब्रह्माण्डाख्यं जगद्गृहम् ।

खे खमेवाप्यनाकारं प्रत्याकारमिव स्थितम् ।। ५९

पातसंवित्समुद्भूतं पतदास्ते दिवानिशम् ।

गच्छन्त्या संविदोद्भूतं गच्छदास्ते दिवानिशम् ।।६०

स्थितसंवित्समुद्भूतं तिष्ठदास्ते दिवानिशम् ।

उत्पतन्त्या चितोद्भूतमुत्पतच्चैव तिष्ठति ।। ६१

एति नाशविदा नाशं महाकल्पादिवेदनैः ।

जायते जन्मसंवित्त्या व्योम्नि सर्वादिवेदनैः ।। ६२

आभाति मौक्तिकगणः शरदम्बरान्त-

र्दृष्टावसत्य उदितोऽप्यतिसत्यरुपः ।

भ्रान्त्या यथा नभसि च स्फुरतां तथैषां

संख्यां विधातुमिह को जगतां समर्थः ।।६३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मो० निर्वाणप्रकरणे उ० पाषा० भ्रान्तिमात्रत्वप्रतिपादनं नामाशीतितमः सर्गः ।।८०।।